# Amritalahari in praise of River Yamuna by Jagannathapandita

# અમૃતલહરી

## Document Information

Text title : amRtalaharI

File name : amRtalaharI.itx

Category : laharI, major_works, jagannAthapaNDita

Location : doc_z_misc_major_works

Author : Jagannathapandita

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Description-comments : In praise of River Yamuna by Panditaraj Jagannatha.

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Amritalahari in praise of River Yamuna by Jagannathapandita

# અમૃતલહરી

માતઃ પાતકપાતકારિણિ તવ પ્રાતઃ પ્રયાતસ્તટં
યઃ કાલિન્દિ મહેન્દ્રનીલપટલસ્નિગ્ધાં તનું વીક્ષતે ।
તસ્યારોહતિ કિં ન ધન્યજનુષઃ સ્વાન્તં નિતાન્તોલ્લસ-
ન્નીલામ્ભોધરવૃન્દવન્દિતરુચિર્દેવો રમાવલ્લભઃ ॥ ૧
નિત્યં પાતકભઙ્ગમઙ્ગલજુષાં શ્રીકણ્ઠકણ્ઠત્વિષાં
તોયાનાં યમુને તવ સ્તવવિધૌ કો યાતિ વાચાલતામ્ ।
યેષુ દ્રાગ્વિનિમજ્જ્ય સજ્જતિતરાં રમ્ભાકરામ્ભોરુહ-
સ્ફૂર્જચ્ચામરવીજિતામરપદં જેતું વરાકો નરઃ ॥ ૨
દાનાન્ધીકૃતગન્ધસિન્ધુરઘટાગણ્ડપ્રણાલીમિલ-
દ્ભૃઙ્ગાલીમુખરીકૃતાય નૃપતિદ્વારાય બદ્ધોઽઞ્જલિઃ ।
ત્વત્કૂલે ફલમૂલશાલિનિ મમ શ્લાઘ્યામુરીકુર્વતો
વૃત્તિં હન્ત મુનેઃ પ્રયાન્તુ યમુને વીતજ્વરા વાસરાઃ ॥ ૩
અન્તર્મૌક્તિકપુઞ્જમઞ્જિમ બહિઃ સ્નિગ્ધેન્દ્રનીલપ્રભં
માતર્મે મુદમાતનોતુ કરુણાવત્યા ભવત્યાઃ પયઃ ।
યદ્રૂપદ્વયધારણાદિવ નૃણામા ચૂડમામજ્જતાં
તત્કાલં તનુતેતરાં હરિહરાકારામુદારાં તનુમ્ ॥ ૪
તાવત્પાપકદમ્બડમ્બરમિદં તાવત્કૃતાન્તાદ્ભયં
તાવન્માનસપદ્મસદ્મનિ ભવભ્રાન્તેર્મહાનુત્સવઃ ।
યાવલ્લોચનયોઃ પ્રયાતિ ન મનાગમ્ભોજિનીબન્ધુજે
નૃત્યત્તુઙ્ગતરઙ્ગભઙ્ગિરુચિરો વારાં પ્રવાહસ્તવ ॥ ૫
કાલિન્દીતિ કદાપિ કૌતુકવશાત્ત્વન્નામવર્ણાનિમા-
ન્વ્યસ્તાનાલપતાં નૃણાં યદિ કરે ખેલન્તિ સંસિદ્ધયઃ ।
અન્તર્ધ્વાન્તકુલાન્તકારિણિ તવ ક્ષ્માભૃતે વારિણિ
સ્નાતાનાં પુનરન્વહં સ મહિમા કેનાધુના વર્ણ્યતે ॥ ૬
સ્વર્ણસ્તેયપરાનપેયરસિકાન્પાન્થઃકણાસ્તે યદિ

બ્રહ્મઘ્નાન્ગુરુતલ્પગાનપિ પરિત્રાતું ગૃહીતવ્રતાઃ ।
પ્રાયશ્ચિત્તકુલૈરલં તદધુના માતઃ પરેતાધિપ-
પ્રૌઢાહંકૃતિહારિહુંકૃતિમુચામગ્રે તવ સ્રોતસામ્ ॥ ૭
પાયં પાયમપાયહારિ જાન્નિ સ્વાદુ ત્વદીયં પયો
નાયં નાયમનાયનીમકૃતિનાં મૂર્તિં દૃશોઃ કૈશવીમ્ ।
સ્મારં સ્મારમપારપુણ્યવિભવં કૃષ્ણેતિ વર્ણદ્વયં
ચારં ચારમિતસ્તતસ્તવ તટે મુક્તો ભવેયં કદા ॥ ૮
માતર્વારિણિ પાપહારિણિ તવ પ્રાણપ્રયાણોત્સવં
સમ્પ્રાપ્તેન કૃતાં નરેણ સહતેઽવજ્ઞાં કૃતાન્તોઽપિ યત્ ।
યદ્વા મણ્ડલભેદનાદુદયિનીશ્ચણ્ડદ્યુતિર્વેદના-
શ્ચિત્રં તત્ર કિમપ્રમેયમહિમા પ્રેમા યદૌત્પત્તિકઃ ॥ ૯
સંજ્ઞાકાન્તસુતે કૃતાન્તભગિનિ શ્રીકૃષ્ણનિત્યપ્રિયે
પાપોન્મૂલિનિ પુણ્યધાત્રિ યમુને કાલિન્દિ તુભ્યં નમઃ ।
એવં સ્નાનવિધૌ પઠન્તિ ખલુ યે નિત્યં ગૃહીતવ્રતા-
સ્તાનામન્ત્રિતસંખ્યજન્મજનિતં પાપં ક્ષણાદુજ્ઝતિ ॥ ૧૦
અયં પણ્ડિતરાજેન શ્રીજગન્નાથશર્મણા ।
સ્તવઃ કલિન્દનન્દિન્યા નિર્મલો નિરમીયત ॥ ૧૧

॥ ઇતિ પણ્ડિતરાજશ્રીજગન્નથકૃતામૃતલહરિઃ સમાપ્તા ॥

In praise of River Yamuna by Panditaraj Jagannatha.

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*Amritalahari in praise of River Yamuna by Jagannathapandita*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*